जारदोषतः। सद्यो बभूव चाण्डालः सर्व्वस्मादधमोऽशुचिः। तीवरेणैव चाण्डाल्यां चर्म्मकारो बभूव ह। चर्म्मकार्य्याञ्च चाण्डालात् मांसच्छेदी बभूव ह। मांसच्छेद्यां तीवरेण कोँचश्च परिकीर्त्तितः। कोँचस्त्रियान्तु कैवर्त्तात् काण्डारः परिकीर्त्तितः। सद्यश्चाण्डालकन्यायां लेटवीर्य्येण शौनक!। बभूवतुस्तु द्वौ पुत्रौ हड्डिकशौण्डिकौ तथा। क्रमेण हड्डिकन्यायां सद्यश्चाण्डालवीर्य्यतः। बभूवुः पञ्च पुत्राश्च भ्रष्टा वनचराश्च ते। लेटात्तीवरकन्यायां गङ्गातीरे च शौनक!। बभूव सद्यो यो बालो गङ्गापुत्रः प्रकीर्त्तितः। गङ्गापुत्रस्य कन्यायां वीर्य्येण वेशधारिणः। बभूव वेशधारी च पुत्रो युङ्गी प्रकीर्त्तितः। वैश्यात्तीवरकन्यायां सद्यः शुण्डी बभूव ह। शुण्डीयोषिति वैश्यात्तु पौण्ड्रकश्च प्रकीर्त्तितः। क्षत्रात् करणकन्यायां राजपुत्रो बभूव ह। राजपुत्र्यान्तु करणादागरीति प्रकीर्त्तितः। क्षत्रवीर्य्येण वैश्यायां कैवर्त्तः परिकीर्त्तितः। कलौ तीवरसंसर्गाद्धीवरश्च प्रकीर्त्तितः। तीवर्य्यां धीवरात् पुत्रो बभूव रजकः स्मृतः। रजक्यां तीवराच्चापि कोदालो च बभूव ह। नापिताद्गोपकन्यायां सर्व्वस्वी तस्य योषिति। क्षत्राद्बभूव व्याधश्च बलवान् मृगहिंसकः। तीवरात् शुण्डिकन्यायां बभूवुः सप्त पुत्रकाः। ते कलौ हड्डिसंसर्गाद्बभूवुर्दस्यवः सदा। ब्राह्मण्यामृषिवीर्य्येण ऋतोः प्रथमवासरे। कुत्सितस्योदरे जातः कूदरस्तेन कीर्त्तितः। तदशौचं विप्रतुल्यं पतितोह्यृतुदोषतः। सद्यः कोटिकसंसर्गादधमो जगतीतले। क्षत्रवीर्य्येण वैश्यायामृतोः प्रथमवासरे। जातः पुत्रो महादस्युर्बलवांश्च धनुर्द्धरः। चकार वागतीतञ्च क्षत्रियो वारितस्तया। तेन जात्या स पुत्रश्च वागतीतः प्रकीर्त्तितः। क्षत्रवीर्य्येण शूद्रायामृतुदोषेण पापतः। बलवन्तो दुरन्ताश्च बभूवुर्म्लेच्छजातयः। अविद्धकर्णाः क्रूरा निर्भया रणदुर्ज्जयाः। शौचाचारविहीनाश्च दुर्द्धर्षा धर्म्मवर्ज्जिताः। म्लेच्छात् कुविन्दकन्यायां शराकः परिकीर्त्तितः। वर्णसङ्करदोषेण बह्व्यश्च शठजातयः। तासां नामानि संख्याश्च को वा वक्तुं द्विज! क्षमः। वैद्योऽश्विनीकुमारेण जातश्च विप्रयोषिति। वैद्यवीर्य्येण शूद्रायां बभूवुर्बहवो जनाः। ते च ग्राम्यगुणज्ञाश्च मन्त्रौषधिपरायणाः। तेभ्यश्च जाताः शूद्रायां ते व्यालग्राहिणो भुवि"।

षोड़शपदार्थमध्ये जातिरूपपदार्थभेदश्च गौ०सू०उक्तो यथा

"साधर्म्म्यवैधर्म्म्याभ्यां प्रत्यवस्थानं जातिः" सू०। विवृतञ्चैतत् विश्वनाथेन। "क्रमप्राप्तां जातिं लक्षयति। साधर्म्म्यवैधर्म्म्याभ्यामिति सावधारणोनिर्द्देशस्तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्म्यवैधर्म्म्याभ्यां प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः यद्यप्युभाभ्यां प्रत्यवस्थानस्य प्रत्येकप्रत्यवस्थानेऽव्याप्तिरेकप्रत्यवस्थानस्य लक्षणत्वे परप्रत्यवस्थानेऽव्याप्तिर्नवान्यतरप्रत्यवस्थानं नियतं सर्व्वत्र जातावभावात्तथापि व्याप्तिनिरपेक्षतया दूषणाभिधानमित्येव वाच्यं तेन च सन्दर्भेण दूषणासमर्थत्वं स्वव्याघातकत्वं वा दर्शितं तथा च छलादिभिन्नदूषणासमर्थमुत्तरं स्वव्याघातकमुत्तरं वा जातिरिति सूचितं साधर्म्म्यसमादिचतुर्व्विंशत्यन्यान्यत्वं तदर्थइत्यपि वदन्ति"।

तद्भेदाश्चतुर्व्विंशतिस्ते च गौतमेन दर्शिता यथा

"साधर्म्म्यवैधर्म्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्य्यसमाः" सू०

"तत्र च विशेषलक्षणार्थं जातिं विभजते" सू०।

अत्र च साधर्म्म्यादीनां कार्य्यान्तानां द्वन्द्वे तैः समा इत्यर्थात् साधर्म्म्यसमादयश्चतुर्व्विंशतिर्जातय इत्यर्थः अत्र च जातेर्व्विशेष्यत्वात् समाशब्दं मन्यन्ते भाष्यवार्त्तिकादौ समाशब्दः अग्रिमसूत्रेषु तु समशब्दो निर्व्विवाद एव तत्र जातिशब्दस्य स्त्रीलिङ्गतया यद्यपि नान्वयस्तथापि प्रतिषेधो विशेष्य इति भाष्यादयः। वयन्तु तद्विकल्पादिति सूत्रस्थविकल्पस्यैव विशेष्यत्वं विविधः कल्पः प्रकारो विकल्पः तथा चैते साधर्म्म्यसमादयोजातिविकल्पा एवमग्रिमसूत्रेष्वपि। इत्यञ्च जातेर्व्विशेषणत्वे साधर्म्म्यसमेत्यपीति ब्रूमः समीकरणार्थं प्रयोगः समइति वार्त्तिकं यद्यपि नैतावता समीकरणं तथापि समीकरणोद्देश्यकत्वमस्त्येव अथ वा साधर्म्म्येण समं यत्र स साधर्म्म्यसमः एकत्र व्याप्तेराधिक्येऽपि साधर्म्म्यं सममेवेति भावः" वृत्तिः

"साधर्म्म्यवैधर्म्म्याभ्यामुपसंहारे तद्धर्म्मविपर्य्ययोपपत्तेः साधर्म्म्यवैधर्म्म्यसमौ" १।२ सू०।

"साधर्म्म्यवैधर्म्म्यसमौ लक्षयति। उपसंहारे साध्यस्योपसंहरणे वादिना कृते तद्धर्म्मस्य साध्यरूपधर्म्मस्य यो विपर्य्ययो व्यतिरेकस्तस्य साधर्म्म्यवैधर्म्म्याभ्यां केवलाभ्यां व्याप्त्यनपेक्षाभ्यां यदुपपादनं ततो हेतोः साधर्म्म्यवैधर्म्म्यसमावुच्येते तदयमर्थः वादिना अन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिनः साधर्म्म्यमात्रप्रवृत्तहेतुना